# उच्च माध्यमिक परीक्षा मॉडल प्रश्न–पत्र 2021

**SENIOR SECONDARY EXAMINATION, MODEL QUESTION PAPER-2021**

## आदर्श–प्रश्न पत्रम्

## उच्च माध्यमिक

## संस्कृत साहित्यम्

**समयः 3¼ घण्टे** **पूर्णांक 80**

## परीक्षार्थिभ्यः सामान्य निर्देशाः

1 परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यतः लेख्यः।

2 सर्वे प्रश्नाः अनिवार्याः।

3 प्रत्येकस्य प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम्।

4 प्रत्येकस्य प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम्।

5. प्रश्नानां अंकभाराणि निम्नानुसाराणि सन्तिः

| खण्ड | प्रश्नों की संख्या | अंक प्रत्येक प्रश्न | कुल अंक भार |
|---|---|---|---|
| खण्ड–अ(A) | 1 ( i से x ) 2 से 11 =20 | 1 | 20 |
| खण्ड–ब(B) | 12 से 19 = 8 | 2 | 16 |
| खण्ड–स(C) | 20 से 23 = 4 | 4 | 16 |
| खण्ड–द(D) | 24 से 25 = 2 | 5 | 10 |
| खण्ड–य(E) | 26 से 28 = 3 | 6 | 18 |

**प्रश्न 01 अद्योलिखित प्रश्नानाम् उत्तरस्य उचित क्रमाक्षरं स्व उत्तरपुस्तिकायां लिखतु –** **(10X1=10)**

(क) ऊँ सहनाववतु वाक्ये 'नौ' पदस्य अर्थः कः ?

(अ) नावौ (आ) नद्यौ

(इ) शिवरामौ (ई) गुरूशिष्यौ

(ख) वडवानलः कस्याग्निः कथ्यते ?

(अ) समुद्रस्य (आ) वनस्य

(इ) गृहस्य (ई) भू गर्भस्य

(ग) श्री मदभगवद्गीता महाभारतस्य कस्मिन् पर्वणि अस्ति ?

(अ) भीष्म पर्वणि (आ) वन पर्वणि

(इ) सभा पर्वणि (ई) विराट पर्वणि

(घ) चातकेभ्यः जलं कः ददाति ?

(अ) मेघः (आ) यक्षः

(इ) इन्द्रः (ई) कुबेरः

(ङः) दिलीपस्य परीक्षार्थं नन्दिनी हिमालयगुहायां प्रविष्टवती –

(अ) एक विंशतितमे दिवसे (आ) द्वाविंशे दिवसे

(इ) त्रयोविंशतितमे दिवसे (ई) विंशतितमे दिवसे

(च) माघस्य आश्रयदाता आसीत् ?

(अ) वर्मलातः (आ) सुप्रभदेवः

(इ) विक्रमः (ई) भोजः

(छ) पञ्चतन्त्रस्य रचियता वर्तते ?

(अ) बाणभट्टः (आ) दण्डी

(इ) विष्णु शर्मा (ई) नारायण पण्डितः

(ज) शस्त्रिणां महाव्रतं किं अस्ति ?

(अ) रक्त मण्डनं (आ) दीनलोकमोषणं

(इ) शान्ति–खण्डनं (ई) विपन्नरक्षणं

(झ) ''संघेशक्तिः कलौ युगे'' इतिकथितम् ?

(अ) वेदव्यासेन (आ) चाणक्येन

(इ) नवल किशोरेण (ई) बाणभट्टेन

(ञ) यक्षः कियत् काल पर्यन्तम् शापितः आसीत् ?

(अ) एक मास पर्यन्तम् (आ) एक वर्ष पर्यन्तम्

(इ) त्रिमास पर्यन्तम् (ई) षड्मास पर्यन्तम्

**प्रश्न 2–5 प्रश्न संख्या 2 तः 5 पर्यन्तं रेखांकित पदानि आधृत्य प्रश्नानिर्माणं कृत्वा एक पंक्त्यां उत्तरं प्रदत –**

प्रश्न –2 सर्वः स्वार्थ समीहते। 1

प्रश्न –3 अमरशक्ते त्रयः पुत्राआसन्। 1

प्रश्न –4 न आत्मानम् अवसाद्येत्। 1

प्रश्न –5 मानवाः सर्वत्र विजयं कामयन्ते। 1

**प्रश्न 6 तः 8 पर्यन्तं अद्योलिखित पद्यांशेषु प्रयुक्त अलंकारस्य नामोल्लेखं कुरूत –**

प्रश्न –6 हंसीव कृष्ण। ते कीर्तिः स्वर्गंगामवगाहते। 1

प्रश्न –7 वघाय वध्यस्य शरं शरण्यः। 1

प्रश्न –8 संसार विष वृक्षस्य द्वे रसवत्फले। 1

**प्रश्न 9 तः 11 पर्यन्तं रिक्त स्थानं पूरयित्वा स्व उत्तरपुस्तिकायां उत्तरं लिखत –**

प्रश्न –9 स्ववीर्य गुप्ता हि ................................................ 1

प्रश्न –10 योगस्थः कुरू कर्माणि ................................................ धनञजयः। 1

प्रश्न –11 विशेषेण राज्ञाम्। ........................................... हि तेषामुदेष्टारः। 1

**निम्नलिखित प्रश्नानां संस्कृत भाषायाम् उत्तरं लिखत् –**

प्रश्न –12 ''इन्द्र विजयम्'' रचनाकारस्य किं नाम अस्ति ? 2

प्रश्न –13 डॉ. हरिराम आचार्य कविता रचनाकार्यहेतोः केन पुरस्कारेण पुरूस्कृतः ? 2

प्रश्न –14 मुद्राराक्षसम् इति नाटकं कतिसु अंकेषु विभक्तं अस्ति ? 2

प्रश्न –15 डॉ. नारायण शास्त्री कांकरः पण्डितस्य पितुः कः नाम अस्ति ? 2

प्रश्न –16 ''मौज मन्दिरः'' इति शासकीय धर्म सभायाः अध्यक्ष पदं कः सुशोभितम् ? 2

प्रश्न –17 पूज्यमानाः अपि देवताः न ते प्रसीदन्ति। इत्यत्र प्रसीदन्ति इति क्रियायाः कर्ताः कः अस्ति ? 2

प्रश्न –18 अद्योलिखित श्लोकस्य अन्वय सहिताम् सरलम् अर्थं हिन्द्यां संस्कते वा लिखत –

गीयतां गीयतां गीयताम् अद्य मात् वन्दना मधुस्वरेण गीयताम्। 2
मात् भूरियं हि कर्मभूः पुराणमंगला। सु विश्रुतातपोव्रता सुदर्शना सुवत्सला ।।
अनादि–धर्म–मालिनी, अनन्त पुण्य शालिनी।

प्रश्न –19 अद्योलिखितम् कस्यचित् एकस्य अलंकारस्य लक्षणोदाहरणे लिखत – 2

यमकम्/उपमा

प्रश्न –20 अद्योलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 4

आसीत् पयोधि पर्यन्त पृथ्वीप्रशासकः इक्ष्वाकु वंशोद्भवः लोक ललामः दिलीपो नाम भूपतिः मगधराज पुत्री सुदक्षिणा तस्य सहधर्मचारिणी आसीत्। कुल गुरू वशिष्ठस्य त्रिकाल दर्शिनः परामर्शं प्रसादमेति मत्वा सन्तान हीनो सः सम्राट पुत्र प्राप्तीच्छया कामिन्या

सुदक्षिणयां सह आत्मानं काम धेनु प्रसूतेः नन्दिन्याः सेवायां नियोजितवान्।

(क) मगधराजपुत्री का असीत् ? (एक पदेन उत्तरम) 1

(ख) वशिष्ठः कस्य कुल गुरूः आसीत् ? (पूर्ण वाक्येन उत्तर) 1

(ग) लोकललामः दिलीपः इत्यत्र विशेषणपदं किम् अस्ति ? 1

(घ) ''समुद्रः'' इत्यस्य पर्यायपदं गद्यांशात् चित्वा लिखत् ? 1

अथवा

अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत। 4

भवादृशा एवं भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः। गुरूवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शंखाभरणमाननशेभासमुदयमधिकतरमुपजनयति। हरत्यतिमलिनमन्धकारमिव दोषाजातं प्रदोषसमयनिशाकर इव। गुरूपदेशः प्रशमहेतुर्वयः परिणाम इव पलितरूपेण शिरसिजजालममलीकुर्वन् गुणरूपेण तदेव परिणमयति।

(क) उपदेशगुणाः कुत्र सुखेन प्रविशन्ति ? (पूर्णवाक्येन उत्तरं दीयताम्) 1

(ख) 'अभव्यस्य श्रवणस्थितं गुरूवचनं किं उपजनयति ? 1

(ग) 'भवादृशा एव भवन्ति भाजनान्युपदेशानाम्' इत्यत्र भवादृशा इत्ययं शब्दः कस्य कृते प्रयुक्तः किमर्थं चायम् उपदेशयोग्यः अस्ति ? 2

प्रश्न –21 अद्योलिखित पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 4

योगस्थः कुरू कर्माणि संग व्यक्त्वा धनञजय।<br>
सिद्दयसिद्धयोः समोभूत्वा समत्वं योग उच्यते ।।

(क) योगः किम् उच्यते ?

(ख) किं व्यक्त्वा कर्माणि कुर्यात् ?

(ग) 'योगस्थः कुरू कर्माणि' अत्र किं क्रियापदम् ?

(घ) 'परिव्यज्य' इति पदस्य पर्यायवाचिपदं श्लोकात् चित्वा लिखत।

अथवा

जातं वंशे भुवनविदिते पुष्कावर्तकानां,<br>
जानामि त्वां प्रकृति–पुरूषं कामरूपं मघोनः।<br>
तेनार्थित्वं त्वयि विधिवशात् दूरबन्धुर्गतोऽहम्<br>
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।।

(क) यक्षानुसारेण मेघाः केषां वंशे उत्पन्नाः आसन् ? 1

(ख) 'दूरबन्धुर्गतोऽहम्' इत्यत्र दूरबन्धुः शब्दस्य कः अभिप्रायः ? 1

(ग) 'याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामां ' इति सूक्तिवाक्यं व्याख्यायत। 2

प्रश्न –22 अद्योलिखितं अपठितं गद्यांशं पठित्वा उत्तराणि लिखत – 4

अस्मिन् संसारे द्विविधाः जनाः दृश्यन्ते। केचन भाग्यवादिनः अपरे पुरूषार्थशीलाः। भाग्यवादिनः कथयन्ति यत्–भाग्यं फलति सर्वत्र न तु विद्या न च पौरूषम् इति। नरः किमपि कुत्रापि न करोति, ईश्वरेच्छा सदा बलीयसी भवति। पुरूषार्थशालिनः वदन्ति यत् उन्नतिः पुरूषार्थेन एव भवति। अभीष्टपदार्थानां सुखम् आप्तुम् उद्योग एवं मुख्यं साधनम्। सुखस्य कारणं उद्योगः अस्ति दुःखस्य च आलस्यम्।

(क) ' भाग्यं फलति सर्वत्र न तु विद्या न च पौरूषम् ' इति के कथयन्ति ? (एकपदेन उत्तरं)
(ख) अभीष्टपदार्थानां सुखम् आप्तुम् मुख्यं साधनम् किम् ? (पूर्णवाक्येन उत्तरं दीयताम्)
(ग) द्विविधाः जनाः इत्यत्र विशेषणं विशेष्य–पदं किम् ?
(घ) पुरूषार्थशालिनः किं वदन्ति ?

अथवा

मानवः जीवन निर्वाहाय यां कामपि आजीविकां ग्रहीतुं शक्नोति। तस्यां पठनपाठनस्य कृषेः, वाणिज्यस्य, देशसेवायाश्य कार्याणि सन्ति। परन्तु स सदा जीवन साफल्याय सत्कर्म अवश्यं कुर्यात्। अतः कदाचिदपि उद्देश्यत्यागो न विधेयः। निरूद्देश्यं जीवनं विनश्यति। जीवनस्य साफल्याय उद्देश्यमपि सद् एव स्यात्। मनुष्यस्य सत्कर्मणा सदुद्देश्यमपि अवश्यं पूर्ण भवति।

प्रश्न –23 अद्योलिखितम् अपठितम् गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानामुत्तराणि लिखत – 4

अयम् अस्माकं भारत देशः अस्ति। अत्र भरत नामकः राजा वसतिस्म। तस्य सम्बन्धात् अस्य नाम भारतम् इति। अस्य उत्तरस्यां दिशि हिमालयः पर्वतः दक्षिणस्यां च हिन्दमहासागरः अस्ति। अत्र गंगा यमुना सरयू गोदावरी प्रभृतयः देवनद्यः प्रवहन्ति यासां जलेन भारत भूमिः शस्य श्यामला अस्ति इयं वीरप्रसूता भूमिः अस्ति। विविधतायाम् एकता भारतस्य विशेषता अस्ति। अस्माकं राष्ट्रध्वजः त्रिवर्णात्मकः। राष्ट्रिय वाक्यम्– ''सत्यमेव जयते नानृतम्'' राष्ट्रिय चिह्नं सिंह शीर्षम्। राष्ट्रगीतम् राष्ट्रभाषा च अस्य राष्ट्रीयतायाः मुख्याधारा।

(क) भारत वर्षस्य उत्तरस्यां दिशि कः पर्वतः अस्ति ? (एकपदेन उत्तरं) 1
(ख) भारतस्य का विशेषता अस्ति ? (पूर्णवाक्येन उत्तरं दीयताम्) 1
(ग) ''देवनद्यः प्रवहन्ति'' इत्यत्र किं कर्तृपदम् ? 1
(घ) ''प्रसविनी'' इति पदस्य समानार्थकं पदम् अनुच्छेदात् चित्वा लिखत् ? 1

अथवा

महाकविः कालिदासः संस्कृत वाङ्.मयस्य श्रेष्ठः कवि आसीत्। सः त्रीणि नाटकानि लिखितवान्। तेषु अभिज्ञानशाकुन्तलम् अति प्रसिद्धम् नाटकम् अस्ति। अस्मिन् नाटके सप्त अंकाः सन्ति। तेषु अपि चतुर्थः अंकः विशिष्टमनोहरोवर्तते। अस्मिन् विषये केनचित् कविना कथितम्– ''काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।'' अस्य नाटकस्य नायकः दुष्यन्तः नायिका च शकुन्तला।

(क) अभिज्ञान शाकुन्तलनाटके कति अंका सन्ति ? (एकपदेन उत्तरं) 1

(ख) अभिज्ञान शाकुन्तलम् ''नायक–नायिका'' के ? (पूर्णवाक्येन उत्तरं दीयताम्) 1

(ग) ''श्रेष्ठ कविः'' इत्यत्र विशेष्यपदचयनं कुरूत ? 1

(घ) अभिज्ञान शाकुन्तल नाटके कः अंकः विशिष्टमनोहरो वर्तते ? 1

प्रश्न –24 अद्योलिखित छन्दसः लक्षणोदाहरणे लिखत – 5

(क) इन्द्रवजा

अथवा

मन्दाक्रान्ता 3

अद्योलिखित पद्यांशंस्य गणचिन्हं प्रदर्शयन् छन्सः नामोल्लेखंकुरूत।

पृथ्व्यिां पुत्रास्ते जननि बहवः सन्ति सरलाः।

अथवा

या सृष्टिः स्त्रष्टुराद्या, वहति विधिहुतं या हविर्याच होत्री। 2

प्रश्न –25 अद्योलिखित रेखांकित पदेषुप्रयुक्तविभक्तेः नामोल्लेखं कृत्वा तस्य सूत्रं चापि लिखत–

(क) मोहनः <u>ग्रामं</u> प्रति गच्छति। 1

(ख) <u>शिष्याय</u> स्वस्ति। 1

(ग) <u>जटाभिः</u> तापसः प्रतीयते। 1

(घ) हरिः <u>असुरात्</u> त्रायते। 1

(ड.) <u>गवांगोषु</u> वा कृष्णा बहुसीरा। 1

अथवा

(क) <u>गुरवे</u> नमः

(ख) <u>कविषु</u> कालिदासः श्रेष्ठः।

(ग) मुक्तये <u>हरिं</u> भजति।

(घ) <u>अलम्</u> विवादेन।

(ड.) जनकः <u>पुत्राय</u> क्रुध्यति।

प्रश्न –26 अद्योलिखित कश्चित् द्विपदयोः सूत्रोल्लेखपूर्वकं सन्धिविच्छेद कुरूत – 1½+1½ = 3

(क) मध्वरिः, परोपकारः

महेन्द्रः, गंगोधः

(ख) अद्योलिखित कश्चित् द्विपदयोः सूत्रोल्लेखपूर्वकं सन्धिं कुरूत – 1½+1½ = 3

| | |
|---|---|
| विष्णु + उदयः | कवि + इन्द्रः |
| ने + अति | हित + उपदेशः |

प्रश्न –27 प्रदत्तशब्दानां प्रयोगं कुर्वन् एकम् अनुच्छेदं लिखत – 6

भातीयसंस्कृतिः, धर्मप्राधान्यम्, आध्यात्मिकी भावना,
सदाचारपालनम्, वर्णव्यवस्था, आश्रमव्यवस्था, कर्मवादः
पुनर्जन्म, अहिंसापालनम्, तपोमयं जीवनम्।

अथवा

क्रमरहितानि वाक्यानि समुचितक्रमानुसारं लिखत –

(क) किंचित् कालान्तरं शशकः अपि जागरयित्वा तत्र उपागच्छत्।
(ख) शशकः तीव्रवेगेन धावयित्वा श्रान्तः जातः।
(ग) 'कच्छपः लक्ष्यं प्राप्तवान्' इति दृष्ट्वा शशकः लज्जितोऽभवत्।
(घ) कच्छपः मन्दं–मन्दं किन्तु निरन्तरं चलन् लक्ष्यं प्राप्तवान्।
(ड.) एकदा तयोः मध्ये धावनप्रतिस्पर्धा अभवत्।
(च) सः एकस्य वृक्षस्य छायायाम् अतिष्ठत् शीघ्रमेव निद्राधीनश्य अभवत्।
(छ) तस्य वेगः तीव्रः आसीत्, अतः सः गर्वितः अभवत्।
(ज) शशकः कच्छपस्य उपहासम् अकरोत्।
(झ) एकस्मिन् वने एकः शशकः आसीत्।
(ञ) एकदा सः मन्दं–मन्दं गच्छन्तं कच्छपम् अपश्यत्।

प्रश्न –28 अधोलिखितवाक्येषु केषांचित् षड्वाक्यानां संस्कृत भाषायाम् अनुवादं कुरूत – 6X1=6

(i) मैं दूध पीता हूँ।
(ii) वह मित्रों के साथ उद्यान में खेलता है।
(iii) सड़क के दोनों ओर वृक्ष हैं।
(iv) सरोवर में कमल का फूल खिलता है।
(v) बालक घोड़े से गिरता है।
(vi) राजेश महाविद्यालय में पढ़ेगा।
(vii) वीणा ने कल श्रीमद्भगवद्गीता पढ़ी।
(viii) आप मुझे पुस्तक दो।
(ix) राम पत्र लिखता है।
(x) कवियों में कालिदास श्रेष्ठ है।
(xi) वृक्ष से पत्ता गिरता है।
(xii) बालक को पुष्प अच्छा लगता है।